संस्कृतवार्तायाः

दिनाङ्क :- 13/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- भारतीयान्तरिक्षानुसन्धानसङ्घटनेन स्पेडैक्स इत्यभियानान्तर्गतं द्वयोः उपग्रहयोः पृथक्करण-प्रक्रिया निर्विघ्नतया सम्पादिता।
- केन्द्रीयायुषमन्त्री प्रतापराव-जाधवः अद्य नवदिल्ल्याम् अस्य वर्षस्य योगमहोत्सवस्य उद्घाटनं कृतवान्।
- देशस्य विविधस्थलेषु श्वः वर्णानामुत्सवः होलिकापर्व्व इत्यतीव-हर्षोल्लासेन आचरिष्यते।
- ऋतुविभागेन पूर्वानुमानितं यत् अद्य असम-मेघालय-अरुणाचलप्रदेशानां केषुचित् भागेषु प्रचण्डवृष्टिः भविष्यति।
- विमेन्स्-प्रीमियर्-लीग्-क्रीडायाम्, अद्य सायङ्काले मुम्बई-नगरस्य ब्रेबोर्न-क्रीडाङ्गणे मुम्बई-इण्डियन्स्-दलं गुजरात्-जायण्ट्स्-दलं सम्मुखीकरिष्यति।

-----------------------------------------------

इसरो

भारतीयान्तरिक्षानुसन्धानसङ्घटनेन स्पेडैक्स इत्यभियानान्तर्गतं द्वयोः उपग्रहयोः पृथक्करण-प्रक्रिया निर्विघ्नतया सम्पादिता। अनेनैव भारतेन अन्तरिक्षान्वेषण-यात्रायां कश्चन महत्त्वपूर्णः पदक्षेपः समासादितः। अवसरेऽस्मिन् केन्द्रीयविज्ञान-प्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः अस्याभियानस्य सफलप्रदर्शनार्थं सर्व्वानपि शुभकामनाभिः अभ्यनन्दत्। सामाजिकान्तर्जालिक-माध्यमेन मन्त्रिणा प्रख्यापितं यत् भारतीयान्तरिक्ष-स्थानकमिदं चन्द्रयानचतुर्थं समेत्य भाव्यभियानानां सफल-सञ्चालनार्थं मार्गं प्रशस्तीकरिष्यति।

-----------------------------------------------

योगदिवस

जूनमासस्य एकविंशति-दिनाङ्के समायोजयिष्यमानाय अन्ताराष्ट्रिय-योगदिवसाय इदानीं केवलं शतदिवसाः एव अवशिष्टाः। अस्य सज्जतायै केन्द्रीयायुष-मन्त्री प्रतापराव-जाधवः अद्य नवदिल्ल्याम् अस्य वर्षस्य योगमहोत्सवस्य उद्घाटनं कृतवान्। अस्मिन् अवसरे असौ उक्तवान् यत् आगामि-शतदिवसावधौ देशस्य विभिन्नभागेषु दशमहत्वपूर्ण-कार्यक्रमाः आयोजयिष्यन्ते।

दश-कार्यक्रमाणां माध्यमेन विभिन्न-स्थलेषु योगस्य कार्यक्रम: भविष्यति। तत्रत्याः जनाः तस्मिन् कार्यक्रमे सम्मिलिताः भविष्यन्ति। योगः एकदिवसाय न अपितु प्रतिदिनाय भवेत्।

श्रीजाधवेन उक्तं यत् एतेषां कार्यक्रमाणामन्तर्गतं दश-सहभागि-देशैः सह योगादान-प्रदान-कार्यक्रमस्य 'योग-सङ्गम' इत्येतस्य आयोजनं भविष्यति। असौ संसूचितवान् अयं 'योग-सङ्गम' कार्यक्रमः देशस्य दशसहस्र-स्थलेषु आयोजयिष्यते।

-----------------------------------------------

अमितशाह

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य स्वलोकसभा-क्षेत्रे गुजरातस्य गान्धीनगरे षड्-चत्वारिंशदधिककैक-शत-कोटिरूप्यकाणां विभिन्नविकास-परियोजनानां दृश्यश्रव्य-परान्तर्जालीय-माध्यमेन उद्घाटनं शिलान्यासं च कृतवान्। एतासु परियोजनासु रेल-मार्ग-स्वास्थ्यसेवाः सम्मिलिताः सन्ति। गुजरातराज्यस्य परिवर्तनशील-विकासस्य उल्लेखं कुर्वन् श्रीशाहः अवदत् यत् राज्ये परिवहनोर्जा-क्षेत्रयोः महती प्रगतिः जाता। असौ साणन्द-नगरे पञ्च-शत-चिकित्सकीय-शय्यायुक्तस्य चिकित्सालयस्य, गान्धीनगरे नूतनस्य नागरिक-चिकित्सालयस्य च स्थापनायाः घोषणाम् अकरोत्।

-----------------------------------------------

विदेशमन्त्री

विदेशमन्त्री डॉ. एस. जयशङ्करः सूचनाप्रसारणमन्त्री अश्विनी वैष्णवः च अस्य वर्षस्य WAVES इति विश्व-श्रव्य-दृश्य-मनोरञ्जन-शिखर सम्मेलनात् प्राक् अद्य नवदिल्ल्यां वैश्विक-समुदायेन सह सम्पर्कं करिष्यतः। अस्य आयोजनस्य माध्यमेन, प्रशासनस्य उद्देश्यः शीघ्रतया वर्धमानेभ्यः प्रसारमाध्यमेभ्यः मनोरञ्जनक्षेत्रेभ्यः च एकीकृत-वैश्विक-मञ्चरूपेण WAVES इत्येतस्य परिवर्तनकारि-क्षमतायाः समेधनम् इत्यस्ति। कार्यक्रमावधौ शताधिकराजदूताः उच्चायुक्ताः च प्रसारमाध्यमेषु मनोरञ्जनक्षेत्रेषु च सहक्रियात्मक-दृष्ट्यवसराणां रूपरेखां सज्जीकरिष्यन्ति। WAVES इति शिखरसम्मेलनस्य प्रथमं संस्करणं मई-मासस्य प्रथम-दिनाङ्कतः चतुर्थदिनाङ्कं यावत् मुम्बय्याम् आयोजयिष्यते।

---

माण्डविया-विकसित भारत

केन्द्रीय-युवप्रकरण-खेलमन्त्री डॉ. मनसुख-मण्डाविया उक्तवान् यत् केन्द्रप्रशासनं सप्तचत्वारिंशदधिक-द्विसहस्रतमं वर्षं यावत् भारतं विकसित-राष्ट्ररूपेण निर्मातुं सङ्कल्पानुरूपं रणनीतिक-नीतीनां उपक्रमाणाञ्च माध्यमेन युवकानां सशक्तिकरणाय प्रतिबद्धमस्ति। ह्यः सायङ्काले कश्मीर-विश्वविद्यालये विकसित-भारत-युवसङ्कल्पोपक्रमान्तर्गतम् एकस्मिन् कार्यक्रमे डॉ. मण्डाविया भारतस्य भविष्यं निर्मातुं युवकानां महत्वपूर्ण-भूमिकायै बलं प्रदत्तवान्। असौ प्रोक्तवान् यत् युवच्छात्राणां शक्तिः, महत्वाकाङ्क्षा, नवाचारः च भारतस्य विकासयात्राम् अग्रे वर्द्धिष्यन्ति। डॉ. मण्डाविया अवदत् यत् विकसित-भारतस्य स्वप्नः देशस्य युवकानां दृढसङ्कल्पेन प्रतिभया च सम्पूरयिष्यते।

---

पीबी-शब्द-वर्षपूर्त्तिः

प्रसारभारत्याः पीबी-शब्दसेवाभिः मासेऽस्मिन् एकः वर्षः सम्पूरितः। इयं सेवा एकस्मै वर्षाय इतोऽपि समेधिता। प्रसारभारत्या समुद्घोषितं यत् 'शब्द' इत्येतस्य निःशुल्कसेवाः षड्विंशत्युत्तर-द्विसहस्रवर्षं यावत् यथावस्थमेव प्रचलिष्यन्ति। अनेन विशेषतया प्रसारसङ्घटनानि लाभं प्राप्स्यन्ति। सूचना-प्रसारण-मन्त्रालयेन प्रकाशितं यत् शब्द इत्येतस्य पार्श्वे पञ्चदश-शताधिकानां

वार्त्ताहराणां, सुदृढसमवायः वर्तते। मन्त्रालयेन प्रोदीरितं यत् देशस्य समाचार-फलकानि, शब्दमाध्यमेन दूरदर्शनस्य आकाशवाण्याश्च विश्वसनीय-कोशं प्राप्स्यन्ति।

---

दिल्ली-होलिपर्व्व

अशेषे हि देशे श्वः वर्णानामुत्सवः होलिकापर्व्व इत्यतीव-हर्षोल्लासेन आचरिष्यते। इदं पर्व्व केवलं वर्णेषु मिष्टान्नेष्वेव नैव विरमते अपितु देशस्य विविधराज्येषु विभिन्ननामभिः, विलक्षण-परम्पराभिश्च अस्याचरणं विधीयते। अस्मिन् पर्व्वणि क्वचिज्जनाः दण्डप्रहारेण अस्याचरणं कुर्वन्ति क्वचिच्च जनाः लोकगीत-गायनपूर्वकं एतं पर्व्व आमन्यन्ते। उत्तरप्रदेशस्य नन्दग्रामात् जनाः भगवतः श्रीकृष्णस्य गोपालकानाञ्च वेशं धृत्वा होलिकाचरणाय बरसानाग्रामं प्रति गच्छन्ति। उत्तरप्रदेशस्य व्रजक्षेत्रे वाराणसीक्षेत्रे च होलिकोत्सवः समारब्धः।

मुख्यमन्त्री योगी-आदित्यनाथः अद्य गोरखपुरक्षेत्रे होलिकादहन-शोभायात्रायां भागं भजिष्यति। राष्ट्रिय-राजधान्यां जनाः उत्सवमालक्ष्य उल्लासयुताः, उत्साहभरिताश्च सन्ति। नगरेषु जनाः अस्योत्सवस्य अभूतपूर्वाचरणाय वस्तु-क्रयणार्थं आपणेषु एकत्रिताः सन्तिः।

---

ऋतुविभाग

ऋतुविभागेन पूर्वानुमानितं यत् अद्य असम-मेघालय-अरुणाचलप्रदेशानां केषुचित् भागेषु प्रचण्डवृष्टिः भविष्यति। विभागेन उक्तं यत् अद्य दिल्ली-हरियाणा-जम्मू-कश्मीर-चण्डीगढ-उप-हिमालयी-पश्चिमबङ्ग-सिक्किमेषु गर्जनेन सह प्रचण्डवायुः प्रवहति इति आशास्यते। आगामि-द्वि-त्रि-दिवस पर्यन्तम् एतेषु स्थलेषु स्थितिः समाना एव भविष्यति। ऋतुविभागेन अनुमानितं यत् अद्य विदर्भ-ओडिशा-गुजरातेषु उष्णतरङ्गस्य स्थितिः भविष्यति।

------------------------------------------------

## विमेन्स-प्रीमियर-लीग

विमेन्स्-प्रीमियर्-लीग्-क्रीडायाम्, अद्य सायङ्काले मुम्बई-नगरस्य ब्रेबोर्न-क्रीडाङ्गणे मुम्बई-इण्डियन्स्-दलं गुजरात्-जायण्ट्स्-दलं सम्मुखीकरिष्यति। सायङ्काले सार्ध-सप्तवादने स्पर्धा आरप्स्यते। निर्णायकस्पर्धायै डेल्ही-कैपिटल्स्-दलेन पूर्वमेव स्वस्थानं सुरक्षितम्।

।। इति वार्ता:।।